# શ્રી આચાર્યપ્રપત્તિઃ

shrI AchAryaprapattiH

sanskritdocuments.org

May 13, 2018

# shrI AchAryaprapattiH

# શ્રી આચાર્યપ્રપત્તિઃ

## Sanskrit Document Information

Text title : AchAryaprapattiH

File name : AchAryaprapattiH.itx

Category : deities_misc, gurudev, rAmAnujasampradAya, prapatti

Location : doc_deities_misc

Proofread by : PSA Easwaran psawaswaran at gmail.com

Acknowledge-Permission: Shri Tripursundari Ved Gurukulam, Sahibabad (Ghaziabad), UP

Latest update : March 24, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 13, 2018

*sanskritdocuments.org*

# શ્રી આચાર્યપ્રપત્તિઃ

શ્રીમત્પ્રસન્નમુખમણ્ડલમુજ્જ્વલન્તં,
વિશ્વપ્રકાશકૃતયે જગદાશ્રયં તમ્ ।
શ્રી શ્રીનિવાસચરિતામૃતપૂર્ણપાત્રં,
શ્રીબાલદેશિકમહં શરણં પ્રપદ્યે ॥ ૧॥

નિર્હેતુકેન કરુણાચરણેન નિત્યં
લોકસ્ય સર્વહૃદયાનિ સમાવિશન્તમ્ ।
વિદ્વદ્વિચક્ષણવિલક્ષણભક્તિરમ્યં
શ્રીબાલદેશિકમહં શરણં પ્રપદ્યે ॥ ૨॥

નિત્યં પ્રસન્નમનસા મનસાં મુનીનાં
સમ્મોહનાય ધૃતચારુચરિત્રચર્યમ્ ।
નિર્લેપનિમર્દનિરામયમદ્વયં તં
શ્રીબાલદેશિકમહં શરણં પ્રપદ્યે ॥ ૩॥

યોગં પરં ભગવતઃ પ્રતિપત્તિજાતં
નારાયણસ્ય જગતીષુ વિબોધયન્તમ્ ।
વિદ્યા વિવૃદ્ધતપસા વપુષા વિવૃદ્ધં
શ્રીબાલદેશિકમહં શરણં પ્રપદ્યે ॥ ૪॥

સુપ્રાતરેવ સતતં પરિહાય શય્યાં
પ્રેયાં સમાદરભરેણ હરિં સ્તુવન્તમ્ ।
સ્વાધ્યાયપાઠનિરતં વિરતં વિવાદૈઃ
શ્રીબાલદેશિકમહં શરણં પ્રપદ્યે ॥ ૫॥

કૃત્વા ક્રિયાઃ સપઠનાઃ પટુના ક્રમેણ
સાન્ધ્યં સમાપ્ય સકલં ચ તદાશ્રયેણ ।
સત્કૃત્ય ચાતિથિકુલં સુખમાસ્થિતં તં
શ્રીબાલદેશિકમહં શરણં પ્રપદ્યે ॥ ૬॥

નાનારસસમૃદ્ધપરિચારકપાણિપાત્રૈઃ
સમ્પ્રાર્થિતાઙ્ઘ્રિરજસં પરમાદરેણ
શ્રી શ્રીપતેરપિ સદા મનસોઽનુરૂપં
શ્રીબાલદેશિકમહં શરણં પ્રપદ્યે ॥ ૭॥

ધર્મપ્રધાનચરિતૈર્વ્યપનીય કાલં
માધ્યાહ્નિકં પરિસમાપ્ય યથા ક્રમેણ ।
કિઞ્ચિદ્વિરમ્ય પઠકાનપિ પાઠયન્તં
શ્રીમન્મુકુન્દગુરુમન્વહમાશ્રયામિ ॥ ૮॥

અધ્યાસ્ય લોકમુપદિશ્ય હિતોપદેશાન્
સમ્ભાષ્ય ભૂસુરગણાન્સમુપાસ્ય સન્ધ્યામ્ ।
નીરાજને ભગવતઃ કૃતચિત્તમાર્યં
શ્રીમન્મુકુન્દગુરુમન્વહમાશ્રયામિ ॥ ૯॥

શ્રીભારતેન કિલ ભાગવતેન વાપિ
શ્રીસામ્પ્રદાયિકનિબન્ધશતૈસ્તથાન્યૈઃ ।
રામાયણાદિચરિતૈ રજનીં નયન્તં
શ્રીમન્મુકુન્દગુરુમન્વહમાશ્રયામિ ॥ ૧૦॥

હોરાચતુષ્ટયવિવક્ષિતમધ્યરાત્રે
યોગં દધાન ઇવ યઃ પ્રતિયાતિ નીચમ્ ।
તં સર્વભવ્યવિભવૈર્ભુવિ ભાસમાનં
શ્રીમન્મુકુન્દગુરુમન્વહમાશ્રયામિ ॥ ૧૧॥

સૌશીલ્યમઙ્ગલગુણૈઃ સમલઙ્કૃતં તં
સદ્ભાવવર્તનવિધિં પ્રદિશન્તમુચ્ચૈઃ ।
આચાર્યવૃત્તવિકસત્સુયશો મયૂખં
શ્રીમન્મુકુન્દગુરુમન્વહમાશ્રયામિ ॥ ૧૨॥

શ્રીડીડવાનપુરતઃ પ્રકટીભવન્તં
શ્રીરામધામ બહુધા ચ સમાશ્રયન્તમ્ ।
શ્રીમદ્ધનાભગુરુમઞ્જુલપુણ્યપુઞ્જં
શ્રીમન્મુકુન્દગુરુમન્વહમાશ્રયામિ ॥ ૧૩॥

ઇત્યાત્મબોધરસિકસ્ય ગુરોર્નવીનાં

દાસેન રામકવિના રચિતાં પ્રપત્તિમ્ ।
પ્રીત્યા પ્રભાતસમયે પઠતાં જનાનાં
કલ્યાણકલ્પલતિકા વિતતા ભવન્તિ ॥ ૧૪॥

ઇતિ શ્રી આચાર્યપ્રપત્તિઃ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrI AchAryaprapattiH*
pdf was typeset on May 13, 2018

Please send corrections to *sanskrit@cheerful.com*